## ॥ गणपति आत्मार्थ् पूजा विधिम् ॥

Worship of Lord Ganapati for the home shrine

### ॥ दीप पूजाम् ॥ Worship of the lamp (Light the Lamps)

शुभं करोति कल्याणं आरोग्यं धन-सम्पदः ।

शत्रु बुद्धि विनाशाय दीप-ज्योतिः नमोऽस्तु ते ॥

दीपो ज्योतिः परं ब्रह्म दीपो ज्योतिः जनार्दनः ।

दीपो हरतु मे पापं सन्ध्या दीपं नमोऽस्तु ते ॥

(apply candana and ku~Nkuma)

ॐ दीप देवताभ्यो नमः । दिव्य गन्धन् धारयामि ॥

### ॥ गुरु प्रर्थानम् ॥ Prayer to the Guru (Namaskara Mudra)

ॐ गुरुर्ब्रह्मा गुरुर्विष्णु गुरुदेवो महेश्वरः ।

गुरुर्-सक्शात्-पारब्रह्म तस्मै श्री गुरवे नमः ॥

गुरवे सर्व-लोकानां भिषजे भव रोगिणाम् ।

निधये सर्व विद्यानां श्री दक्षीणा-मूर्तये नमः ॥

### ॥ गणपति प्रर्थानम् ॥ Prayer to Lord Ganapati (Tap the temples then do Namaskaara-mudra)

शुक्लाम्-बरधरं विष्णुं शशि-वर्णं चतुर्भुजम् ।

प्रसन्-नवदनं ध्यायेत् सर्वविघ्नो-पशान्तये ॥

॥ आसन विधिः ॥ Worship of the seat (with water, draw a dot and triangle; then namaskaara-mudra)

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।

त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

(be seated)

॥ आचमनीयं ॥ Sipping water (3x)

ॐ सुमुखाय स्वाहा ।

ॐ एकदन्ताय स्वाहा ।

ॐ गज-कर्णकाय स्वाहा ॥

॥ प्राणायामम् ॥ Breath-control

(namaskaara-mudra) ॐ अस्य प्राणावस्य ।

(touch forehead) पर-ब्रह्म ऋषिः ।

(touch lip) दैवि-गायत्रि चन्दः ।

(touch heart) परमात्मा देवता ।

namaskaara-mudra) प्राणायमे विनियोगः ।

(breath in through left nostril)

ॐ भूः । ॐ भुवः । ॐ सुवः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यं ।

(retain breath)

ॐ तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि । धीयो यो नः प्रचोदयात् ॥

(breath out through right nostril)

ॐ आपो ज्योति-रसोमृतं ब्रह्म भूर्भुवः सुवराप ॐ ॥

॥ सङ्कल्पः ॥ Resolution to perform Puujaa (hold akShatas between hands and offer to Lord with "kariShye")

ॐ तत् सत् ॐ। अद्य पूर्वोक्त एवङ्गुण-सकल। विशेषेण विशिष्टायां। अस्यां शुभ-तिथौ। ॐ श्री महा-गणेश्वर प्रीत्यर्थं। ॐ श्री महा गणपति उद्दिष्य। ॐ श्री महा गणपति प्रसाद् सिद्ध्यर्थं। माता-पितृ-देवता। इष्ठ-देवता। कुल-देवता। ग्राम- देवता। वास्तु देवता। स्थान देवता। सर्व देवता। श्री सत्गुरु देवता च। प्रसाद् सिद्ध्यर्थं। यथा शक्ति। ध्याना-वाहनादि गणपत्य्-आत्मार्थ पूजां करिष्ये ॥

(sprinkle water on devotees)

अप उपस्-प्रिश्य

॥ आत्म पूजाम् ॥ Worship of the Divine Self (Apply candana)

ॐ आत्मने नमः। दिव्य गन्धन् धारयामि ॥

(namaskaara-mudra before heart)

देहो जीवालयः प्रोक्तः जीवो देवः सनातनः।

त्यजेद-ज्ञाना निर्माल्यं सोहं-भावेन पूजयेत् ॥

॥ घण्टा पूजाम् ॥ Worship of the bell (ring bell)

आगमार्थन् तु देवानां गमनार्थन् तु रक्षसाम्।

कुर्वे घण्टा-रवं तत्र देवता-ह्वान लाञ्छनं ॥

॥ भूतोत्सारणम् ॥ Prayer to remove negative energies and entities (continue ringing bell)

अप-सर्पन्तु ते भूता ये भूता भुविसंस्थिताः ।

ये भूता विघ्न-कर्तारः ते नश्यन्तु शिवज्ञया ॥

॥ कलश पूजाम् ॥ Worship of the Sacred Water-pot (apply candana & ku~Nkumam)

ॐ कलश देवताभ्यो नमः । दिव्य गन्धन् धारयामि ॥

(keep right palm over water pot)

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ।

नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

(dhenu mudra)

ॐ अमृतं भवन्तु ॥

॥ शङ्ख पूजाम् ॥ Worship of the Conch (Apply candana and ku~nkuma)

ॐ शङ्ख देवताभ्यो नमः । दिव्य गन्धन् धारयामि ॥

(put 3 spoons of water in Conch & do namaskaaramudra)

पाञ्चजन्याय विद्महे पावमानाय धीमहि ।

तन्न-श्शङ्खः प्रचोदयात् ॥

(pour water from Conch into kalasha)

शङ्ख जलेन कलश पूरित्वा ॥

॥ शुचिः ॥ Purification (sprinkle water on all puujaa items and people)

ॐ आप वित्र पवित्रो वः सर्व-वष्टन्ग तोपि वः ।
यः स्मारेत् पुन्दरीकक्षं सः बह्य भ्यन्तर शुचिः ॥
कलश-जालेन सर्व-पूजा-द्रव्याणि आत्मानं च प्रोक्ष्य ॥

॥ ध्यानम् ॥ Meditation on the Lord

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥ (repeat five times)
(then offer flowers / akShatas)
ॐ गं गणपतये नमः । महा-गणपतिं ध्यायामि ॥

॥ गणपत्य् आवाहनम् ॥ Ganapati Invocation

ॐ गणानां त्वा गणपति गं हवामहे
कविङ् कवीना-मुपम-श्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत
आ नः शृण्वन्-नूतिभिः सीद सादनम् ॥
ॐ महा-गणपतये नमः । ॐ बूर् भुवः सुवः ॥
(offer flowers / akShatas)
महा-गणपतिं आवाहयमि स्थापयमि ॥

॥ आसनम् ॥ Seat (offer flowers / akShatas)

ॐ महा-गणपतये नमः। रत्न-सिंहासनं समर्पयामि।

॥ पाद्यम् ॥ Washing feet (offer a spoon of water)

ॐ महा-गणपतये नमः। पादयोः पाद्यं पाद्यं समर्पयामि।

॥ अर्घ्यम् ॥ Washing Hands (offer a spoon of water)

ॐ महा-गणपतये नमः। हस्तयोः अर्घ्यं अर्घ्यं समर्पयामि।

॥ आचमनीयम् ॥ Pure water for sipping (offer 3 spoons of water)

ॐ महा-गणपतये नमः। ॐ भूर् भुवः सुवः। आचमनीयं समर्पयामि।

॥ मधुपर्कम् ॥ Sweet Drink (offer sweet drink or a spoon of water)

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।

मध्वीनः सन्त्वोषधीः, ॥

मधु-नक्त-मुतोषसि मधुमत्-पार्थिवꣳ रजः।

मधु द्यौरस्तु नः पिता ॥

मधु-मन्नो वनस्पतिर्-मधुमाꣳ अस्तु सूर्यः।

मा-ध्वीर्गावो भवन्तु नः ॥

मधु मधु मधु ॥

मधु-पर्कं गृहाणेमां गज-कर्णक वन्दित ।

गणेश्वर विनायक महापातक नाशनम् ॥

ॐ महा-गणपतये नमः । मधु-पर्कं समर्पयामि ॥

॥ स्नानम् ॥ (Bath (ring bell and pour water over the Lord; or spinkle water with a flower petal 3 times)

ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्शसे ॥ योवः शिवतमो रसस्तस्य भाजयतेहनः । उशतीरिव मातरः ॥ तस्मा अरं गमाम वो यस्य क्शयाय जिन्वथ । आपो जनयथा च नः ॥

सुरसिन्धु समानीतं सुवर्ण-कलशा-स्थितं ।

स्नानार्थं गृह्यतां शम्भो सलिलं विमलं गणेश ॥

ॐ महा-गणपतये नमः । गङ्गा-स्नानं स्नापयामि ।

स्नाना-नन्तरम् आचमनीयं समर्पयामि ॥

॥ अहाभिषेकम् ॥ Ritual Bath [optional] (pour panchamrita, milk, water etc. while ringing bell)

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्ष-भिर्यजत्राः ॥ स्थिरैरङ्गै-स्तुष्टुवाँ-सस्तनूभिः । व्यश्येम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्ध-श्रवाः । स्वस्ति नः पूषा विश्व-वेदाः ॥ स्वस्ति नस्ताक्ष्यो अरिष्ट-नेमिः । स्वस्ति नो बृहस्पतिर्-दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ।

ओं नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्वमसि । त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षात्-दात्माऽसि नित्यम् ॥ १ ॥

ऋतं वच्मि । सत्यं वच्मि ॥ २ ॥

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवा-नूचानम्-अव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवो-त्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवा-धरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥ ३ ॥

त्वं वङ्-मयस्त्वं चिन्मयः । त्वं-आनन्द-मयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाऽद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञान-मयोऽसि ॥ ४ ॥

सर्वं जग-दिदं त्वत्तो जायते। सर्वं जग-दिदं त्वत्त-स्तिष्ठति। सर्वं जग-दिदं त्वयि लय-मेष्यति। सर्वं जग-दिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक्-पदानि॥ ५॥

त्वं गुण-त्रयातीतः। त्वं अवस्था-त्रयातीतः। त्वं देह-त्रयातीतः। त्वं काल-त्रयातीतः। त्वं मुलाधार-स्थितोऽसि नित्यम्। त्वं शक्ति-त्रयात्-मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्म त्वं विष्णु-स्त्वं रुद्रस्त्वम्-इन्द्रस्त्वम्-अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमा-स्त्वं ब्रह्म भूर्-भुवः सुवरोम्॥ ६॥

गणादिं पूर्व-मुच्चार्य वर्णादीं स्तदनन्-तरम्। अनुस्वारः परतरः। अर्धेन्-दुलसितम्। तारेण ऋद्धम्। एतत्तव मनु-स्वरूपम्। गकारः पूर्व-रूपम्। अकारो मध्य-मरूपम्। अनु-स्वारश्-चान्-त्यरूपम्। बिन्दु-रुत्तर-रूपम्। नादः सन्धानम्। सँहिता सन्धिः। सैषा गणेश-विद्या। गणक ऋषिः। निचृद्-गायत्रि-च्छन्दः। श्री महा-गणपतिर्-देवता। ॐ गं गणपतये नमः॥ ७॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि।
तन्नो दन्तिः प्रचोदयात्॥ ८॥

एकदन्तं चतुर्-हस्तं पाशामङ्-कुश-धारिणम्। रदं च वरदं हस्तैर्-बिभ्राणं मूषक-ध्वजं। रक्तं लम्बोदरं शूर्प-कर्णकं रक्त-वाससम्। रक्त-गन्धनु-लिप्तङ्गं रक्त-पुष्पैः सुपूजितं। भक्ता-नुकम्-पिनं देवं जगत्-कारण-मच्युतम्। आविर्-भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्-परम्। एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥ ९॥

नमो व्रातपतये। नमो गणपतये। नमः प्रमथ-पतये। नमस्ते अस्तु लम्बोदराय एकदन्ताय विघ्नविना-शिने शिवसुताय श्री-वरद-मूर्तये नमो नमः॥ १०॥

एतद्-अथर्वशिर्षं योऽदीते स ब्रह्म-भूयाय कल्पते। स सर्व-विघ्नैर्न बाध्यते। स सर्वत्र सुख-मेधते। स पञ्च-महापापात् प्रमुच्यते। सायम-धीयानो दिवस-कृतं पापं नाशयति। प्रातर-धीयानो रात्रि-कृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो पापो-ऽपापो भवति। सर्वत्रा-धीयनोऽपविघ्नो भवति। धमार्थ-काम-मोक्षं च विन्दति। इदम्-अथर्व-शीर्षम्-अशिष्या-य न देयम्। यो यदि मोहाद् दास्यति स पापीयान् भवति। सहस्रा-वर्तनाद्-यं यं काम-मधीते तं तमनेन साधयेत्॥ ११॥

अनेन गणपतिम-भिषिञ्चति स वाग्मि भवति। चतुर्थ्या-मनश्नन् जपति स विद्यावान् भवति। इत्यथर्-वण-वाक्यम्। ब्रह्माद्या-वरणं विद्यान्न बिभेति कदा-चनेति॥ १२॥

यो दुर्वाङ्-कुरैर्-यजति स वैश्रव-णोपमो भवति । यो लाजैर्-यजति स यशोवान्
भवति । स मेधावान् भवति । यो मोदक-सहस्रेण यजति स वाञ्छित-फलम्-
अवाप्नोति । यः साज्य समिद्-भिर्यजति स सर्वं लभते स सर्वं लभते ॥ १३ ॥

अष्टौ ब्रह्मणान् सम्यग् ग्राहयित्वा सूर्य-वर्चस्वी भवति । सूर्यग्रहे महा-नद्यां
प्रतिमा-सन्निधौ वा जप्त्वा सिद्ध-मन्त्रो भवति । महा-विघ्नात् प्रमुच्यते । महा-
दोषात् प्रमुच्यते । महा-पापात् प्रमुच्यते । महा-प्रत्यवायात् प्रमुच्यते । स
सर्वविद्-भवति स सर्वविद्-भवति । य एवं वेद । इत्य्-उपनिषत् ॥ १४ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्ष-भिर्यजत्राः ॥ स्थिरैरङ्गै-स्तुष्टुवाँ-
सस्तनूभिः । व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्ध-श्रवाः । स्वस्ति नः
पूषा विश्व-वेदाः ॥ स्वस्ति नस्ताक्ष्र्यो अरिष्ट-नेमिः । स्वस्ति नो बृहस्पतिर्-
दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ।
ॐ महा-गणपतये नमः । ॐ भूर् भुवः सुवः । महा-भिषेकं समर्पयामि ॥

Those not preforming abhiShekam should offer panchamritam and shuddhodaka snaanam instead)

॥ पञ्चामृतम् ॥ Five-Nectar Bath (Bath the Lord as for Snaanam above with Panchamritam or water)

मधु-पयः घृत-दधिः शर्करा-स्नानितां कुरु ।

सर्व-सिद्धि-प्रदायक पञ्चामृतं प्रति-गृह्यतां ॥

पञ्चामृतेन परम पञ्च-पातक नाशन ।

स्नानं कुरु सदाराध्य भक्त्-विघ्न-विनाशन ॥

ॐ महा-गनपतये नमः । पञ्चामृत स्नानं स्नापयामि ॥

॥ शुद्धोदक स्नानम् ॥ Purifying bath (Bath the Lord as above with water)

देव-सिन्धु समुद्-भूत द्विज-प्रिय तनुभव ।

स्नानं स्वीकुरु सर्वेश स्नानार्थं प्रति-गृह्यताम् ॥

ॐ महा-गनपतये नमः । शुद्धोदक-स्नानं स्नापयामि ॥

॥ वस्त्रम् ॥ Clothes (offer akShatas)

ॐ महा-गणपतये नमः । वस्त्रार्थं मङ्गलाक्षतान् समर्पयामि ।

(or if you are offering clothes) वस्त्रं समर्पयामि ।

॥ उपावीतम् ॥ Sacrificial Thread (offer akShatas)

ॐ महा-गणपतये नमः । उपावीतार्थं मङ्गलाक्षतान् समर्पयामि ।(or if you are offering sacred thread) उपावीतं समर्पयामि ।

॥ आभरनम् ॥ Gems / Jewlery (offer akShatas)

ॐ महा-गणपतये नमः । आभरनार्थं मङ्गलाक्षतान् समर्पयामि ।

(or if you are offering gems / jewelery) आभरनं समर्पयामि ।

॥ चन्दनम् ॥ Sandal-wood (anoint the Lord with sandal-wood paste)

ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

गन्धन् गृहाण सुरभि मन्दका सुरसूदन ।

कुङ्कुमदि समायुक्तं कुला-चलनि-केतन ॥

ॐ महा-गणपतये नमः । दिव्य परिमळ गन्धान् धारयामि ।

॥ कुङ्कुमम् ॥ Red Powder (offer ku~Nkamam)

गन्ध-स्योपरि हरिद्रा-कुङ्कुमं समर्पयामि ।

॥ भस्मम् ॥ Sacred Ash (offer vibhuuti)

दिव्य परिमळ विभूतिं समर्पयामि ।

॥ अक्षतान् ॥ Unbroken Rice (offer akShatas)

ॐ अहमस्मि सपत्न-हेन्द्र इवारिष्टो अक्षतः ।

अधः सपत्ना मे पदोर्-इमे सर्वे अभिष्ठिताः - ॥

अक्षतान् धवलान् रम्यान् हरिद्रा-चूर्ण-मिश्रितान् ।

कपिल करुणा-सिन्धो गृहाण गुणभूषण ॥

ॐ महा-गणपतये नमः। तदुपरि मञ्गलाक्षतान् समर्पयामि।

॥ पुष्पम् ॥ Flowers (offer red flowers)

रक्तं लम्बोदरं शूर्प-कर्णकं रक्त-वाससम्।

रक्त-गन्धनु-लिप्तङ्गं रक्त-पुष्पैः सुपूजितं ॥

पारिजाता-निनीपञ्च पारिजातानि मालतिं।

पुन्नागं बिल्व-पत्रश्च गृहाण सिद्धि-दायक।

ॐ महा-गणपतये नमः। नान विध परिमळ पत्र-पुष्पं पूजयामि।

॥ पुष्पमालाम् Flower garland (optional) ॥

ॐ महा-गणपतये नमः। पुष्प-मालाम् समर्पयामि।

॥ गणपति शोडश्-आर्चनम् ॥ 16 Praises of Lord Ganapati

॥ सङ्कल्पः ॥ Resolution to perform arcana (hold flowers / akShatas between palms and offer with "kariShye"

अस्य श्री महा गणपति षोडशनाम्-आर्चनं करिष्ये।

(offer flowers / akShatas with "namaha")

ॐ सुमुखाय नमः। ॐ एक-दन्ताय नमः।

ॐ कपिलाय नमः। ॐ गज-कर्णकाय नमः।

ॐ लम्बो-दराय नमः। ॐ विकटाय नमः।

ॐ विघ्न-राजाय नमः। ॐ विना-यकाय नमः।

ॐ धूम्र-केतवे नमः। ॐ गणा-ध्यक्षाय नमः।

ॐ फल-चन्द्राय नमः। ॐ गजा-ननाय नमः।

ॐ वक्रतुण्डाय नमः। ॐ शूर्प-कर्णाय।

ॐ हेरम्बाय नमः। ॐ स्कन्द-पूर्वजाय नमः।

(or) ॥ विघ्नेश्वर अष्टोत्तर-शत-नामार्चनम्॥ 108 Praise of Lord Ganapati

॥ सङ्कल्पः ॥ Resolution to perform arcana (hold flowers / akShatas between palms and offer with "kariShye"

अद्य पूर्वोक्त। एवं गुण विशेषेण विशिष्टायां। अस्यां शुभ-तिथौ॥ ॐ श्री महा गणेश्वर प्रसाद सिद्ध्यर्थं। यथा शक्ति। महा-गणपति शत-नामार्चनम् करिष्ये॥

(offer flowers /akShatas with "namaha")

ॐ विनायकाय नमः।

ॐ विघ्न-राजाय नमः।

ॐ गौरि-पुत्राय नमः।

ॐ गणे-श्वराय नमः।

ॐ स्कन्दा-ग्रजाय नमः।

ॐ अव्ययाय नमः।

ॐ पूताय नमः।

ॐ दक्षाय नमः।

ॐ अध्यक्षाय नमः।

ॐ द्विज-प्रियाय नमः॥ १० ॥

ॐ अग्नि-गर्वच्छिदे नमः।

ॐ इद्र-श्रीप्रदाय नमः।

ॐ वाणी-प्रदाय नमः।

ॐ अव्ययाय नमः।

ॐ सर्व-सिद्धि-प्रदाय नमः।

ॐ सर्व-तनयाय नमः।

ॐ शर्वरी-प्रियाय नमः।

ॐ सर्वात्-मकाय नमः।

ॐ सृष्टि-कर्त्रे नमः।

ॐ देवाय नमः॥ २० ॥

ॐ अनेकार्-चिताय नमः।

ॐ शिवाय नमः।

ॐ शुद्धाय नमः।

ॐ बुद्धि-प्रियाय नमः।

ॐ शान्ताय नमः।

ॐ ब्रह्म-चारिणे नमः।

ॐ गजा-ननाय नमः।

ॐ द्वै-मातुराय नमः।

ॐ मुनि-स्तुताय नमः।

ॐ भक्त-विघ्नवि-नाशनाय नमः॥ ३० ॥

ॐ एकदन्ताय नमः।

ॐ चतुर्-बाहवे नमः।

ॐ चतुराय नमः।

ॐ शक्ति-संयुक्ताय नमः।

ॐ लम्बो-दराय नमः।

ॐ शूर्प-कर्णाय नमः।

ॐ हरये नमः।

ॐ ब्रह्म-विदुत्तमाय नमः।

ॐ कालाय नमः।

ॐ ग्रह-पतये नमः॥ ४० ॥

ॐ कामिने नमः।

ॐ सोम-सूर्याग्नि-लोचनाय नमः।

ॐ पाशाङ्कुश-धराय नमः।

ॐ चण्डाय नमः।

ॐ गुणा-तीताय नमः।

ॐ निरञ्जनाय नमः।

ॐ अकल्-मषाय नमः।

ॐ स्वयं-सिद्धाय नमः।

ॐ सिद्धार्-चित-पदाम्बुजाय नमः।

ॐ बीज-पूर-फलासक्ताय नमः॥ ५०॥

ॐ वरदाय नमः।

ॐ शाश्वताय नमः।

ॐ कृतिने नमः।

ॐ विद्वत्-प्रियाय नमः।

ॐ वीत-भयाय नमः।

ॐ गदिने नमः।

ॐ चक्रिणे नमः।

ॐ इक्षुचा-पधृते नमः।

ॐ श्रीदाय नमः।

ॐ अजाय नमः॥ ६०॥

ॐ उत्पल-कराय नमः।

ॐ श्रीपतये नमः।

ॐ स्तुति-हर्षिताय नमः।

ॐ कुला-द्रिभृते नमः।

ॐ जटिलाय नमः।

ॐ कलि-कल्मष-नाशनाय नमः।

ॐ चन्द्र-चूडा-मणये नमः।

ॐ कान्ताय नमः।

ॐ पाप-हारिणे नमः।

ॐ समा-हिताय नमः॥ ७०॥

ॐ आश्रिताय नमः।

ॐ श्रीकराय नमः।

ॐ सौम्याय नमः।

ॐ भक्त-वाञ्छित-दायकाय नमः।

ॐ शान्ताय नमः।

ॐ कैवल्य-सुखदाय नमः।

ॐ सच्चिदा-नन्द-विग्रहाय नमः।

ॐ ज्ञाननिने नमः।

ॐ दया-युताय नमः।

ॐ दान्ताय नमः॥ ८०॥

ॐ ब्रह्म-द्वेष-विवर्-जिताय नमः।

ॐ प्रमत्त-दैत्य-भयदाय नमः।

ॐ श्रीकण्ठाय नमः।

ॐ विभुदे-श्वराय नमः।

ॐ रामार्-चिताय नमः।

ॐ विधये नमः।

ॐ  नागराज-यज्ञो-पवीतये नमः।

ॐ स्थूल-कण्ठाय नमः।

ॐ स्वयं-कर्त्रे नमः।

ॐ साम-घोष-प्रियाय नमः॥ ९० ॥

ॐ परस्मै नमः।

ॐ स्थूल-तुण्डाय नमः।

ॐ अग्रण्ये नमः।

ॐ धीराय नमः।

ॐ वागीशाय नमः।

ॐ सिद्धि-दायकाय नमः।

ॐ दुर्वा-बिल्व-प्रियाय नमः।

ॐ अव्यक्त-मूर्तये नमः।

ॐ अद्भुत-मूर्ति-मते नमः।

ॐ शैलेन्द्र-तनु-जोत्सङ्ग-खेलनोत्सुक-मानसाय नमः॥ १०० ॥

ॐ स्वलावण्य-सुधा-सारजित-मन्मथ-विग्रहाय नमः।

ॐ समस्त-जगदा-धाराय नमः।

ॐ मायिने नमः।

ॐ मूषक-वाहनाय नमः।

ॐ हृष्टाय नमः ।

ॐ तुष्टाय नमः ।

ॐ प्रसन्-नात्मने नमः ॥ १०८ ॥

ॐ सर्व-सिद्धि-प्रदायकाय नमः ॥

ॐ सिद्धि-विना-यकाय नमः ॥

ॐ त्रिमूर्ति-गणपतये नमः ।

ॐ बुद्धि-सिद्धि-समेत-श्री-विनायक-स्वामिने नमः

ॐ गं गणपतये नमः ।

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्व जन्नमे वशमनाय स्वाहा

इति श्री विघ्नेश्वरा-ष्टोत्तर-शत-नामा-वलिः सम्पुर्णं ॥

॥ धूपम् ॥ Insence (ring bell and wave incese before the Lord in clock-wise circles)

ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् ।

धूर्वति तं धूर्वयं वयं धूर्वामस्त्वं ॥

दशाङ्गं गुग्गुलोपेतं सुगन्धन् सुमनो-हरं ।

आघ्रेयः सर्व-देवानां धूपोऽयं प्रति-गृह्यतां ॥

ॐ महा-गणपतये नमः । ॐ भूर् भुवः सुवः । धूपं आघ्रपयामि । (stop ringing bell & offer a spoon water)

धूपान्-अन्तरं आचमनीयं समर्पयामि । (offer akShatas)

मङ्गलाक्षतान् समर्पयामि ।

॥ दीपम् ॥ Ghee Lamp (ring bell and wave light in clock-wise circles before the Lord)

ॐ उद्दीप्यस्व जातवेदोऽपघ्निं निर्ऋतिं मम । पशुग्ग्श्च मह्यमावह जीवनं च दिशोदिश । मानोहिंग्ं सीज्जातवेदो गामश्वं पुरुषं जगतं । अबिभ्रदग्न आगहि श्रीया मा परिपातय ॥

साज्यं त्रिवर्ति-संयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं ईशपुत्र गणाधिपम् ॥

ॐ महा-गणपतये नमः । ॐ भूर् भुवः सुवः ।
दिव्य मङ्गल-दीपं सन्दर्शयामि । (stop ringing bell & offer a spoon of water)
दीपान्-अन्तरं आचमनीयं समर्पयामि । (offer akShatas)
मङ्गलाक्षतान् समर्पयामि ॥

॥ महा-नैवेद्यम् ॥ Food offering

॥ नैवेद्य शुद्धिम् ॥ Purification of food (ring bell & with a spoon of water circle food three times in clock-wise circles)

ॐ भूर् भुवः सुवः । ॐ तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि । धीयो यो नः प्रचोदयात् ॥

(ring bell loud and sprinkle food)

देव सावित प्रसुव

॥ अमृतम् ॥ Turning food to Nectar (show dhenu mudra)

(say this if it is morning)

ॐ सत्यं त्वर्तेन परिश्चिमि

(say this if it is evening)

ॐ ऋतं त्वा सत्येन परिशिञ्चमि

ॐ अमृतमस्तु । अमृतो-पस्तरण-मसि ॥

॥ पञ्च प्राणार्पनम् ॥ Offering of the Five Vital Breaths of the Food (Ring Bell. hold a flower or akShatas in mR^igi mudra and waft the Praanaas of the food toward the Lord 6 times with "swaahaa")

ॐ प्राणाय स्वाहा ।

ॐ अपानाय स्वाहा ।

ॐ व्यानाय स्वाहा ।

ॐ उदानाय स्वाहा ।

ॐ समानाय स्वाहा ।

ॐ ब्रह्मणे स्वाहा ॥

(keep ringing bell)

ॐ हा ३ वु हा ३ वु हा ३ वु । अहमन्न-महमन्न-महमन्नम् । अहमन्नादो २ ऽहमन्नादो २ ऽहमन्नादः । अहग्ग् श्लोककृ-दहग्ग् श्लोककृ-दहग्ग् श्लोककृत् । अहमस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३ भाइ । योमा ददाति स इदेव मा ३ वाः । अह-मन्नमन्न-मदन्तमा ३ द्मि । अहं विश्वं भुवन-मभ्यभवं । सुवर्ण ज्योतीः । य एवं वेद ॥

अन्नपूर्णे सदापूर्णे शङ्कर-प्राण-वल्लभे ।

ज्ञान-वैराग्य-सिद्ध्यर्थं भिक्षां देहि च पार्वति ॥

माता च पार्वती देवी पिता देवो महेश्वरः ।

बान्धवाः शिव-भक्ताश्च स्वदेशो भुवन-त्रयम् ॥

शाल्यन्नं पायसं क्षीरं लड्डुकान् मोदका-नपि ।

गृहाण कृपया शिव फलानि सुब-हुनिच ॥

(offer flowers / akShatas at the Lord's feet)

ॐ महा-गणपतये नमः । ॐ भूर् भुवः सुवः ।

नाना विध महा-नैवेद्यं निवेदयामि । (namaskaara mudra)

यथा-शक्त्या समर्पीत महा-नैवेद्यं कृपया स्वीकुरु ॥

॥ पनीयं ॥ Water (offer a spoon of water 5 times with "samarpayaami")

मध्ये मध्ये अमृत-पनीयम् समर्पयामि । अमृता-पिधअन-मसि ।

पद प्रक्षलनम् समर्पयामि ।

हस्त प्रक्शलनम् समर्पयामि ।

मुख प्रक्षलनम् समर्पयामि ।

पुनर्-आचमनियं समर्पयामि ॥

॥ ताम्बूलम् ॥ Betel Nut, and digestive spices

पूगीफल-समा-युक्तं नागवल्ली दलैर्युतं ।

कर्पूर-चूर्ण-संयुक्तं ताम्बूलं प्रति-गृह्यतां ॥

(betel nut, betel leaf, camphor, cloves, and cardamom)

ॐ महा-गणपतये नमः । तम्बूलं निवेदयामि ॥

(For special occassions pa~nca aarati may be offered)

॥ पञ्च आरति ॥ Five wick Lamp (Ring bell and wave light before the Lord in clock-wise circles)

सप्रथसभां मे गोपाय । ये च सभ्या-सभासदः । तानिन्द्र-यावतः कुरु । सर्व-मयुरु-पासताम् । अ हे बुध्निय मन्त्रं मे गोपाय । यमृष-यस्त्रै विदा विदुः । ऋचः सामानि यजुंषि । सा हि श्रीरमृता सताम् । पञ्चहूतो हवै नामैषः ।तं वा एतं पञ्च-हूतं सन्तं । पञ्च-होते-त्याचक्षते परोक्षेण । परोक्ष-प्रिया इव हि देवाः ॥

ॐ महा-गणपतये नम । पञ्चारतिं सन्दर्शयामि ।

॥ कपूर नीराजनम् ॥ Camphor Light (Ring bell and wave light before the Lord in clock-wise circles)

ॐ नमो व्रत-पतये । नमो गणपतये । नमः प्रमथ-पतये । नमस्ते अस्तु लम्बोदराय एकदन्ताय विघ्न-विनाशिने शिव-सुताय श्री-वरद-मूर्तये नमो नमः ॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

राजाधिराजाय प्रसह्य साहिने ।
नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् काम कामाय मह्यं ।
कामेश्वरो वै श्रवणो ददतु ।

कुबेराय वै श्रवणाय ।

महाराजाय नमः ॥

ॐ महा-गणपतये नमः । ॐ भूर् भुवः सुवः ।

कर्पूर नीराजनं सन्दर्शयामि ॥ (stop ringing bell and with a spoon of water circle the light three times with the following mantra.)

रक्ष रक्षां धारयामि ॥

(Now waft the light toward the Lord three times. Then recieve the aarati before offering it to all attending the puujaa)

॥ मन्त्र पुष्पाञ्जलिम् ॥ Prayer with Flowers (hold flowers in namaskaara mudra in front of heart. All devotees attending puujaa should be invited to make this offering.)

ॐ योपां पुष्पं वेद । पुष्पवान् प्रजावन् पशुमान् भवति ।

चन्द्रमावा अपां पुष्पम् । पुष्पवान् प्रजावन् पशुमान् भवति ।

य एवं वेद । योपां-आयतनं वेद । आयतनवान् भवति ॥

ॐ तद्ब्रह्म । ॐ तद्वायुः । ॐ ततात्म । ॐ तथ्सत्यं । ॐ तथ्सर्वं । ॐ तत्पुरोर्-

नमः ॥ अन्तश्चरति भूतेषु गुहायां विश्व मूर्तिषु । त्वं यज्ञत्वं वष्ट्कार-स्त्वमिन्द्र-

स्त्वगं रुद्र-स्त्वं विषःणु-स्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपो ज्योती

रसोऽमृतं ब्रह्म भू-र्भुवः सुव रोम् ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृति-लीनस्य यः पर-स महेश्वरः ॥

ॐ महा गणपतये नमः । ॐ भूर् भुवः सुवः ।

ॐ आवाहितभ्याः सर्वाभ्यो देवताभ्यो नमः ।

(offer flowers)

वेदोक्त मन्त्र पुष्पाञ्जलिं समर्पयामि ॥

॥ दक्षिणम् ॥ Offering Money

ॐ नमो हिरण्य-बहवे हिरण्य-वर्णाय हिरण्य-रूपाय हिरण्य-पतये ंबिका-पतये

उमा-पतये पशु-पतये नमो नमः ॥

सौवर्णं रजतं चैव निक्षिप्तं च तवा-ग्रथः ।

सुवर्ण-पुष्पं गणेश सर्व विघ्न हरो भव ॥

(offer money)

ॐ महा-गणपतये नमः । सुवर्ण-पुष्प दक्षिणं समर्पयामि ।

॥ गणपति प्रर्थानम् ॥ Prayer to Lord GaNesha (namaskaara mudram)

शुक्लाम्-बरधरं विश्णुं शशि-वर्णं चतुर्-भुजम् ।

प्रसन्न-वदनं ध्यायेत्-सर्व-विघ्नो-पशान्तये ॥

अगजा-नन पद्मार्कं गजानन-महर्निशं ।

अनेकदं तं भक्तानां एकदन्तं उपास्महे ॥

वक्र-तुण्ड महा-काय सूर्य कोटि सम-प्रभ ।

निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥

सुमु-खश्चै-कदन्-तश्च कपिलो गज-कर्णकः ।

लम्बो-दरश्च विकतो विघ्न-राजो गणाधिपः ॥

धूम्र-केतुर्-गणा-ध्यक्षो फाल-चन्द्रो गजा-ननः ।

वक्रतुण्डः शूर्पकर्णो हेरम्ब स्कन्दपूर्वजः ॥

द्वाद-शैनानि नामानि यः पठेत् श्रुणुयादपि ।

इष्ट-कामं तु कामार्थी धर्मार्थी मोक्ष-मक्षयम् ॥

विद्या-रंभे विवाहे च प्रवेशे निर्गमे तथा ।

सङ्ग्रामे सङ्कटे चैव विघ्न-स्तस्य न जायते ॥

(offer flowers / akShatas)

ॐ महा-गणपतये नमः । प्रथानं समर्पयामि ॥

॥ प्रदक्षिणा नमस्कारान् ॥ Circumambulation / Prostration (stand and hold namaskaara mudra. Circle altar 3 times or turn around to right 3 time.

यानि कानि च पापानि जन्मांतर कृतानि च ।

तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

प्रकृष्ट-पाप-नाशाय प्रकृष्ट-फल-सिद्धये ।

प्रदक्षिनं करोमीश प्रसीद गजकर्णक ॥

(Prostrate)

एकदन्तं महा-कायं लम्बो-दरं गजाननम् ।

विघ्न-नाशकरं देवं हेरम्बं प्रनमा-म्यहम् ॥

(offer flowers / akShatas)

ॐ महा-गणपतये नमः । अनेक कोटि प्रदक्षिणा-नमस्कारान् समर्पयामि ॥

(offer flowers / akShatas)

ॐ महा-गणपतये नमः । समस्तो-पचारान् समर्पयामि ॥

॥ उद्वासनम् ॥ Dispersing the Lord from the image

ॐ गणानां त्वा गणपतिं गं हवामहे

कविङ् कवीना-मुपम-श्रवस्तमम् ।

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत

आ नः शृण्वन्-नूतिभिः सीद सादनम् ॥

ॐ महा-गणपतये नमः । ॐ बूर् भुवः सुवः ॥

महा-गणपतिं । यथा-स्थानं प्रति-ष्ठापयामि ।

(take flower from the Lord's feet and smell. Then place to the heart)

शोभनार्थे क्षेमाय पुनरा-गमनाय च ॥

॥ क्षमर्पनम् ॥ Appologies (namaskaara mudra)

आवाहनं न जानामि न जानामि विसर्जनं ।

पूजाञ्-चैव न जानामि क्षम्यतां गज-कर्णक ॥

मन्त्र-हीनं क्रिया-हीनं भक्ति-हीनं गणेश्वर ।

यत् पूजितं मया देव परि-पूर्णं तदस्तु ते ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

तस्मात् कारुण्य-भावेन रक्ष रक्ष गणेश्वर ॥

॥ स्वस्ति वचनम् आचार्य समर्पनम् ॥ Speeking Auscipcious Word / Offering to the Guru

स्वस्ति प्रजाभ्यः परि-पालयन्तां

न्यायेन मार्गेण महीं महीशाः - ।
गोब्राह्मणेभ्यः शुभमस्तुनित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥

ऐंकार ह्रींकार रहस्य युक्त
श्रींकार कूधार्थ महाविभूत्याः ।
ॐकार मर्म प्रदिपानिभ्यां
नमो नमः श्री-गुरु-पादुकाभ्याम् ॥

आज्ञान-नाशनाय विद्महे ज्ञान-प्रकषाय धीमहि ।
तन्नो गुरु-पादुकाः प्रचोदयात् ॥

तत्-दक्षिणाय विद्महे गुरु-मूर्तये धीमहि । तन्न-श्शिवः प्रचोदयात् ॥

॥ आशीर्वादम् ॥ Blessings (distribute vibhuti, water, and then other prasaadam)

श्री-वर्चस्य-मायुष्य-मारोग्यमाविधात् शोभमानं महीयते ।
धान्यं धन्यं पशुं बहुपुत्रलभं शतसंवत्सरं दीघमायुः ॥

॥ समर्पनम् ॥ Offering of fruits of Worship to the Lord

कायेन वाचा मनसेन्-द्रियैर्वा
बुद्धयात्-मना वा प्रक्रिति स्वभावात् ।
करोमि यद् यद् सकलं परस्मै

विनायकायेति समर्पयामि ॥

अनेन ध्यानेन महा-गणपतिः प्रीयतां ॥

॥ शान्ति पाठ ॥ Prayer for Peace

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु ।
मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ असतो मा सत् गमया ।
तमसो मा ज्योतिर् गमया ।
मृत्योर् मा अमृतं गमया ।
ॐ शान्तिः शान्तिः शन्तिः ॥

॥ गणपत्य्-अर्पणम् ॥ Offering ourselves to the Lord

ॐ तत् सत् ॐ । श्री महा-गणपत्यर्-पनमस्तु ॥